अथ भगवत्प्रातःस्मरणम् ।

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ॥

प्रातर्भामि मनसो वचसामगम्यं, वाचो विभान्ति निखिला यदनुग्रहेण । यन्नेति नेति वचनैर्निगमा अवोचुस्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ प्रातर्भजामि तमसः परमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् । यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥ श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् । प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥

प्रातर्नमामि गणनाथमशेषहेतुं
ब्रह्मादिदेववरदं सकलागमाढ्यम् ।
धर्मार्थकामफलदं परमोक्षहेतुं
वाचामगोचरमनादिमनन्तरूपम् ॥
प्रातर्नमामि दिननाथमघापहारं
गढान्धकारहरमुत्तमलोकवन्द्यम् ।
वेदत्रयात्मकमुदस्तसुरारिमायं
ज्ञानैकहेतुमुरुशक्तिमुदारभावम् ॥
प्रातर्नमामि गिरिजां भवभूतिहेतुं
संसारसिन्धुपरपारकरीं त्रिणेत्राम् ।
तत्त्वादिकारणमुदस्तसुरारिमायां
मायामयीं सुरमुनीन्द्रनतां सुरेशीम् ॥

प्रातर्नमामि गिरिजापतिमिन्दुमौलिं
व्याघ्राजिनाम्बरमुदस्तदयं मनोजे ।
ब्रह्मादिदेववरदं सुरसिद्धजुष्टं
सर्पत्रिशूलडमरून् दधतं पुरारिम् ॥
प्रातर्नमामि कमलापतिमुग्रवीर्यं
नानावतारनिरतं निजरक्षणाय ।
क्षीराब्धिवासममराधिपबन्धुमीशं
पापापहं रिपुहरं भवमुक्तिहेतुम् ॥
प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतमदवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य ॥

प्रातर्भजामि भजतामभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापनुत्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर -
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥

ध्यायेदादित्यसङ्काशं वासुदेवं चतुर्भुजम् ।
शङ्खचक्रगदापद्मवनमालाविराजितम् ॥
तत्पादोदकजां धारां निपतन्तीं स्वमूर्धनि ।
चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्विकां तनुम् ॥
तया संक्षालितं सर्वमन्तर्देहगतं मलम् ॥

महर्षिर्भगवान् व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकम् ॥
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥
हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥

न जातु कामान्न भयान्न लोभाद्-
धर्मं त्यजेज्जीवितस्यापि हेतोः।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः।

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातम् ॥
भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः।
रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च।
सप्तस्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त।
भूरादि कृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुर्ज्वलनः सतेजाः।
नभः सशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ॥
इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च नित्यम्।
दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् ॥

प्रह्लादनारदपराशरपुण्डरीक
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान्।
रुक्माङ्गदार्जुनवासिष्ठविभीषणादीन्
पुण्यानिमान् परमभागवतान् स्मरामि ॥

धर्मो विवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन ।
शत्रुर्विनश्यति धनञ्जयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः ॥

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुन्धती ॥

लोपामुद्रापतिः प्रातरगस्त्यः कीर्त्यते मया ।

कपिलां कामधेनुं च कल्पवृक्षं मणिं तथा ।
समुद्रसहितां लक्ष्मीं कुबेरं संस्मराम्यहम् ॥

नारायणेति वाग्वल्ली चतुरक्षरपल्लवा ।
धर्मार्थकाममोक्षाणां फलदा नात्र संशयः ।

अच्युतानन्तगोविन्दनामोच्चरणभेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं न संशयः ॥

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

कलौ कल्मषचित्तानां पापद्रव्योपजीविनाम् ।
विधिक्रियाविहीनानां गतिर्गोविन्दकीर्तनम् ॥

दधि मधुरं मधु मधुरं द्राक्षा मधुरा सुधापि मधुरैव ।
मधुरादपि तन्मधुरं मथुरानाथस्य नाम यद्गीतम् ॥

विश्वेशो जनको ह्युमा च जननी गङ्गा च मातृष्वसा
ढुण्ढिर्भैरवदण्डपाणिसदृशा ज्येष्ठा मम भ्रातरः।
श्रीकाशी मणिकर्णिका च भगिनी भार्या ममेयं मतिः
सत्कर्माणि सुतास्त एव सुहृदः काश्यां कुटुम्बं मम॥

काशि काशीति काशीति त्रिवारं यः पठेन्नरः।
सोऽपि देशान्तरे वासी काशीवासफलं लभेत्॥

अहं काशीं गमिष्यामि तत्रैव निवसाम्यहम्।
इति ब्रुवाणः सततं काशीवासफलं लभेत्॥

काश्यां तु भैरवो देवः संसारभयनाशकः।
अनेकजन्मजं पापं स्मरणेन विनश्यति॥

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्। वन्दे काशीं गुहं गङ्गां भवानीं मणिकर्णिकाम्॥

यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो विभुः ॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

महाकविश्रीकालिदासकृतरघुकाव्यस्था भगवत्स्तुतिः॥

तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।अभिजग्मु-
र्निदाघार्तश्छायावृक्षमिवाध्वगाः॥ ते च प्रापुरुदन्वन्तं बु-
बुधे चादिपूरुषः।अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि
लक्षणम्॥ भोगिभोगासनासीनं ददृशुस्तं दिवौकसः।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्॥ श्रियः पद्म
निषण्णायाः क्षौमान्तरितमेखले।अङ्के निक्षिप्तचरण-
मास्तीर्णकरपल्लवे॥ प्रबुद्धपुण्डरीकाक्षं बालातपनि-
भांशुकम्।दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥
प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।कौस्तुभा-
ख्यमपां सारं बिभ्राणं बृहतोरसा॥बाहुभिर्विटपाकारै-

र्दिव्याभरणभूषितैः।आविर्भूतमपां मध्ये पारिजातमिवा-
परम्॥ दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम्॥मुक्तशेषवि-
रोधेन कुलिशव्रणलक्ष्मणा। उपस्थितं प्राञ्जलिना वि-
नीतेन गरुत्मता। योगनिद्रान्तविशदैः पावनैरवलो-
कनैः। भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन्॥
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्। अथैनं
तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम्॥नमो विश्वसृजे
पूर्वं विश्वं तदनु बिभ्रते।अथ विश्वस्य संहर्त्रे तुभ्यं
त्रेधास्थितात्मने॥रसान्तराण्येकरसं यथा दिव्यं पयोऽ-
श्नुते।देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः। अजितो जिष्णु-
रत्यन्तमव्यक्तो व्यक्तकारणम्॥ हृदयस्थमनासन्नम-
कामं त्वां तपस्विनम्। दयालुमनघस्पृष्टं पुराणमजरं
विदुः॥ सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः। सर्व
प्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥ सप्तसामोप-
गीतं त्वां सप्तार्णवजलेशयम्। सप्तार्चिर्मुखमाचख्युः
सप्तलोकैकसंश्रयम्॥ चतुर्वर्गफलं ज्ञानं कालावस्था-
श्चतुर्युगाः। चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्। ज्योतिर्मयं वि-
चिन्वन्ति योगिनस्त्वां विमुक्तये॥ अजस्य गृह्णतो जन्म निरी-
हस्य हतद्विषः। स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव॥

[illegible]
ऽसि प्रजाः पातुमौदासीन्येन वर्तितुम् ॥ बहुधाप्यागमै-
र्भिन्नाः पन्थानः सिद्धिहेतवः । त्वय्येव निपतन्त्योघा
जान्हवीया इवार्णवे ॥ त्वय्यावेशितचित्तानां त्वत्समर्पि-
तकर्मणाम् । गतिस्त्वं वीतरागाणामभूयस्संनिवृत्तये ॥
प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव । आप्तवागनु-
मानाभ्यां साध्यं त्वां प्रति का कथा ॥ केवलं स्मरणेनैव
पुनासि पुरुषं यतः । अनेन वृत्तयः शेषा निवेदित-
फलास्त्वयि ॥ उदधेरिव रत्नानि तेजांसीव विवस्वतः
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते ॥ अनवा-
प्तमवाप्तव्यं न ते किञ्चन विद्यते । लोकानुग्रह
एवैको हेतुस्ते जन्मकर्मणोः ॥ महिमानं यदुत्कीर्त्य

तव संह्रियते वचः। श्रमेण तदशक्त्या वा न गुणानामि-
यत्तया ॥ इति प्रसादयामासुस्ते सुरास्तमधोक्षजम्।
भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥

तस्मै कुशलसम्प्रश्नव्यञ्जितप्रीतये सुराः। भयम-
प्रलयोद्वेलादाचख्युः नैर्ऋतोदधेः॥ अथ वेलासमासन्न
शैलरन्ध्रानुनादिना। स्वरेणोवाच भगवान् परिभूता-
र्णवध्वनिः॥ पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।
बभूव कृतसंस्कारा चरितार्थैव भारती॥ बभौ सदशन
ज्योत्स्ना सा विभोर्वदनोद्गता। निर्यातशेषा चरणाद्गङ्गे-
वोर्ध्वप्रवर्तिनी॥ जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ।
अङ्गिनां तमसेवोभौ गुणौ प्रथममध्यमौ॥ विदितं तप्य-

मान च तेन मे भुवनत्रयम् । अकामोपनतेनेव साध्वी-
र्हृदयमेनसा ॥ कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि
न वज्रिणा । स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते ।
स्वासिधारापरिहृतः कामं चक्रस्य तेन मे । स्थापितो द-
शमो मूर्धा लभ्यांश इव रक्षसा ॥ स्रष्टुर्वरातिसर्गात्तु मया
तस्य दुरात्मनः । अत्यारूढं रिपोः सोढं चन्दनेनेव भो-
गिनः ॥ धातारं तपसा प्रीतं ययाचे स हि राक्षसः । दै-
वात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥ सोऽहं दा-
शरथिर्भूत्वा रणभूमेर्बलिक्षमम् । करिष्यामि शरै-
स्तीक्ष्णैस्तच्छिरःकमलोच्चयम् ॥ अचिराद्यज्वभि-
र्भागं कल्पितं विधिवत्पुनः । मायाविभिरनालीढमा-
दास्यध्वे निशाचरैः ॥ वैमानिकाः पुण्यकृतस्त्यजन्तु

मरुतां पथि। पुष्पकालोकसंक्षोभं मेघावरणतत्प-
राः॥ मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान्।
शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥ रावणाव-
ग्रहक्लान्तमिति वागमृतेन सः। अभिवृष्य मरुत्स-
स्यं कृष्णमेघस्तिरोदधे॥ इति॥ श्रीः॥ ॐ॥